ಪ್ರಶ್ನೆ ಪತ್ರಿಕೆ ಕ್ರಮ ಸಂಖ್ಯೆ :

**Q.P. Sl. No. :**

ಮಾರ್ಚ್/ಏಪ್ರಿಲ್ **2026** ರ ಪರೀಕ್ಷೆ-1

**MARCH/APRIL 2026 EXAMINATION-1**

ಒಟ್ಟು ಮುದ್ರಿತ ಪುಟಗಳ ಸಂಖ್ಯೆ : 8 ]

Total No. of Printed Pages : 8 ]

ಒಟ್ಟು ಪ್ರಶ್ನೆಗಳ ಸಂಖ್ಯೆ : 38 ]

Total No. of Questions : 38 ]

**A**

**CCE RF/RR/PF/PR**

**ಸಂಕೇತ ಸಂಖ್ಯೆ : 67-S** **Code No. : 67-S**

# ವಿಷಯ : ತೃತೀಯ ಭಾಷೆ — ಸಂಸ್ಕೃತ

# Subject : Third Language — SANSKRIT

# तृतीयभाषा — संस्कृतम्

**(ಶಾಲಾ ಅಭ್ಯರ್ಥಿ / ಶಾಲಾ ಪುನರಾವರ್ತಿತ ಅಭ್ಯರ್ಥಿ / ಖಾಸಗಿ ಅಭ್ಯರ್ಥಿ / ಖಾಸಗಿ ಪುನರಾವರ್ತಿತ ಅಭ್ಯರ್ಥಿ)**

**(Regular Fresh / Regular Repeater / Private Fresh / Private Repeater)**

ದಿನಾಂಕ : 30. 03. 2026 ] [ Date : 30. 03. 2026

ಸಮಯ : ಬೆಳಗ್ಗೆ 10-00 ರಿಂದ ಮಧ್ಯಾಹ್ನ 1-00 ರವರೆಗೆ ] [ Time : 10-00 A.M. to 1-00 P.M.

ಗರಿಷ್ಠ ಅಂಕಗಳು : 80 ] [ Max. Marks : 80

**Cut here/ಇಲ್ಲಿ ಕತ್ತರಿಸಿ**

***ಪರೀಕ್ಷಾರ್ಥಿಗಾಗಿ ಸಾಮಾನ್ಯ ಸೂಚನೆಗಳು :***

1. ಈ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯು ಒಟ್ಟು 38 ಪ್ರಶ್ನೆಗಳನ್ನು ಹೊಂದಿದೆ.
2. ಈ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯನ್ನು ಹಿಮ್ಮುಖ ಜಾಕೆಟ್ ಮೂಲಕ ಮೊಹರು (ಸೀಲ್) ಮಾಡಲಾಗಿದೆ. ಪರೀಕ್ಷೆ ಪ್ರಾರಂಭವಾಗುವ ಸಮಯಕ್ಕೆ ***ನಿಮ್ಮ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯ ಬಲಬದಿ ಪಾರ್ಶ್ವವನ್ನು ಕತ್ತರಿಸಿ (ಬಾಣದ ಗುರುತನ್ನು ಅನುಸರಿಸಿ), ಎಡಬದಿ ಪಾರ್ಶ್ವವನ್ನು ಕತ್ತರಿಸಬೇಡಿ.*** ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯಲ್ಲಿ ಎಲ್ಲಾ ಪುಟಗಳು ಇವೆಯೇ ಎಂದು ಪರೀಕ್ಷಿಸಿಕೊಳ್ಳಿ.
3. ಪ್ರಶ್ನೆಗಳಿಗೆ ಕೊಟ್ಟಿರುವ ಸೂಚನೆಗಳನ್ನು ಪಾಲಿಸಿ.
4. ಬಲ ಭಾಗದಲ್ಲಿ ಕೊಟ್ಟಿರುವ ಅಂಕಿಗಳು ಪ್ರಶ್ನೆಗಳಿಗಿರುವ ಪೂರ್ಣ ಅಂಕಗಳನ್ನು ತೋರಿಸುತ್ತವೆ.
5. ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯನ್ನು ಓದಿಕೊಳ್ಳಲು 15 ನಿಮಿಷಗಳ ಕಾಲಾವಕಾಶವು ಸೇರಿದಂತೆ, ಉತ್ತರಿಸಲು ನಿಗದಿಪಡಿಸಲಾದ ಸಮಯವನ್ನು ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯ ಮೇಲ್ಭಾಗದಲ್ಲಿ ನೀಡಲಾಗಿದೆ.

***परीक्षार्थिनां सामान्यसूचनाः***

1. अस्मिन् प्रश्नपत्रे अष्टत्रिंशत् (38) प्रश्नाः सन्ति ।
2. इदं प्रश्नपत्रं विपरीतेन आवरणेन मुद्रिताङ्कमस्ति । **परीक्षासमये प्रश्नपत्रमुद्घाटयितुं दक्षिणपार्श्वेन कर्तयत (बाणचिह्नम् अनुसरत) । प्रश्नपत्रमुद्घाटयितुं वामपार्श्वेन मा कर्तयत ।** प्रश्नपत्रस्य पृष्ठानि पूर्णानि सन्ति वा इति अवलोकयत ।
3. प्रश्नानां विषये निर्दिष्टाः नियमाः अनुपालनीयाः ।
4. प्रश्नानां प्रति अधिकृताः अङ्काः पार्श्वे लिखिताः सन्ति ।
5. प्रश्नपत्रमुत्तरयितुं निर्धारितः समयः प्रश्नपत्रस्य उपरि भागे लिखितः अस्ति । पञ्चदशनिमेषाः प्रश्नपत्रस्य पठनार्थं निर्धारिताः सन्ति ।

Tear here/इतः कर्तयत

**TEAR HERE TO OPEN THE QUESTION PAPER WITH REVERSE JACKET**
**विपरीतेन आवरणेन सह प्रश्नपत्रमुद्घाटयितुमितः कर्तयत**

Tear here/इतः कर्तयत

SANSKRIT
67-S 10/507

**I. अधोलिखितप्रश्नेभ्यः चत्वारः विकल्पाः प्रदत्ताः । तेषु समुचितं विकल्पं चित्वा क्रमाक्षरेण सह उत्तरपत्रिकायां लिखत ।** **8 × 1 = 8**

1. 'कौन्तेयः' अस्य समानार्थकपदम् इदं भवति ।

(A) अर्जुनः (B) दुःशासनः

(C) कृष्णः (D) दुर्योधनः

2. 'उन्नतः' अस्य विरुद्धार्थकपदम् इदं भवति ।

(A) नीचः (B) अवनतः

(C) बहिः (D) अन्तः

3. 'राघवेन्द्रः' अत्र एतत् लिङ्गं भवति ।

(A) पुल्लिङ्गम् (B) स्त्रीलिङ्गम्

(C) नपुंसकलिङ्गम् (D) अन्यलिङ्गम्

4. 'अपृच्छत्' अत्र एषः लकारः अस्ति ।

(A) लट् लकारः (B) लङ् लकारः

(C) लोट् लकारः (D) लिट् लकारः

5. 'निपतन्ति' अत्र एषः पुरुषः अस्ति ।

(A) उत्तमपुरुषः (B) मध्यमपुरुषः

(C) प्रथमपुरुषः (D) अन्यपुरुषः

6. 'गरिष्ठः' अत्र अयं तद्धितप्रत्ययः भवति ।

(A) छ प्रत्ययः (B) म प्रत्ययः

(C) थाल् प्रत्ययः (D) इष्ठन् प्रत्ययः

67-S 10/507

7. ''गृहे भोजनं खादामः'' । अत्र रेखाङ्कितपदस्य कारकम् इदं भवति ।

(A) कर्तृकारकम् (B) कर्मकारकम्

(C) अपादानकारकम् (D) अधिकरणकारकम्

8. 'अहं पाठं लिखन् अस्मि' । अत्र कृदन्तपदम् इदं भवति ।

(A) अहं (B) पाठं

(C) लिखन् (D) अस्मि

**II. चतुर्थं पदं लिखत ।** **4 × 1 = 4**

9. मधुसूदनः — कृष्णः :: हनूमान् — ..................... ।

10. जानकी — सीता :: दाशरथिः — ..................... ।

11. कालपर्ययात् क्षयं गच्छति — शिक्षा :: सुबद्धमूलाः निपतन्ति — ................ ।

12. अर्जुनस्य सारथिः — कृष्णः :: कर्णस्य सारथिः — ..................... ।

**III. एकवाक्येन उत्तरं लिखत ।** **4 × 1 = 4**

13. कः राजा श्रीवैष्णवमतदीक्षां स्वीकृतवान् ?

14. लङ्कानगरं केषां राजधानी ?

15. अक्षयाः निधयः कति सन्ति ?

16. पूज्यनदी का ?

**IV. द्वित्रैः वाक्यैः उत्तरं लिखत ।** **4 × 2 = 8**

17. कीदृशः महाबलः वः पातु ?

18. मेलुकोटे क्षेत्रे आकर्षकस्थानानि कानि ?

19. पञ्च अचोरहरणीयानि कानि ?

20. अर्जुनः कृष्णं किम् अपृच्छत् ?

**अथवा**

कतिविधाः जनाः देवं भजन्ते ? ते च के ?

67-S 10/507

**V. संस्कृतभाषया अनुवादं कुरुत ।** **1 × 2 = 2**

21. ಗಾಳಿಯು ಎಲ್ಲಾ ಕಡೆ ಇದೆ. ಗಾಳಿಯಿಲ್ಲದೆ ಪ್ರಾಣಿಗಳು ಬದುಕಲಾರವು.

Air is everywhere. Animals can't live without air.

**VI. कर्नाटकभाषया आङ्ग्लभाषया वा अनुवादं कुरुत ।** **1 × 2 = 2**

22. नारिकेलवृक्षः कल्पवृक्षः इति भूलोके जनाः भावयन्ति । अस्य वृक्षस्य सर्वे भागाः उपयोगाय भवन्ति ।

**VII.** 23. **विग्रहवाक्यं लिखत ।** **1 × 2 = 2**

a) लम्बोदरः ।

b) उपवृक्षम् ।

**अथवा**

**समस्तपदं लिखत ।**

a) शूलं पाणौ यस्य सः = ..................

b) दिनं दिनं = ..................

**VIII. लक्षणं विलिख्य अलङ्कारस्य नाम लिखत ।** **1 × 2 = 2**

24. 'सोमदत्तः अभिमन्युः इव शूरः' ।

**IX. यथानिर्देशम् उत्तरं त्रिचतुरैः वाक्यैः लिखत ।** **2 × 3 = 6**

25. ''गच्छ अद्य अहं पुस्तकं न दास्यामि'' ।

कः पाठः ? कः अवदत् ? कम् अवदत् ?

26. ''जित्वा पृथिवीं ददामि'' ।

कः पाठः ? कः अवदत् ? कम् अवदत् ?

67-S 10/507

**X.** 27. **सन्धिं विभज्य नाम लिखत ।** **1 × 3 = 3**

a) ज्योतिर्गमय ।

b) देव इति ।

c) वदनाम्बुजे ।

**XI. प्रस्तारं विलिख्य गणविभागं कृत्वा छन्दोनाम लिखत ।** **1 × 3 = 3**

28. प्रस्थादुदस्थात् प्रथमानवेगः ।

**XII. कवेः देश–काल–कृतीनां विषये त्रिचतुरैः वाक्यैः उत्तरं लिखत ।** **1 × 3 = 3**

29. महर्षिः वेदव्यासः ।

**अथवा**

भोजराजः ।

**XIII. पद्यपाठस्य नाम विलिख्य तात्पर्यं पञ्चषैः वाक्यैः कर्नाटकभाषया, संस्कृतभाषया, आङ्ग्लभाषया वा लिखत ।** **3 × 3 = 9**

30. न हि ज्ञानेन सदृशं पवित्रमिह विद्यते ।
तत्स्वयं योगसंसिद्धः कालेनात्मनि विन्दति ।।

31. आकारसदृशप्रज्ञः प्रज्ञया सदृशागमः ।
आगमैः सदृशारम्भ आरम्भसदृशोदयः ।।

32. अशनं भिन्नं वसनं भिन्नं
रूपं भिन्नं रीतिरपि ।
भिन्नं भाग्यं भिन्नो वर्णः
भिन्नं सर्वं भेददृशे ।।

67-S 10/507

**XIV. पद्यपाठस्य नाम विलिख्य पद्यं पूरयत ।** **1 × 3 = 3**

33. गुरवे ..............................................................................

.............................................................................. नमः ।।

**XV. दशवाक्यैः उत्तरं कर्नाटकभाषया, आङ्ग्लभाषया, संस्कृतभाषया वा लिखत ।**

**2 × 4 = 8**

34. संस्कृतग्रामस्य वैशिष्ट्यं वर्णयत ।

35. ''उभयभारती भारतस्य आदर्शनारी'' समर्थयत ।

**अथवा**

''विक्रमः वेतालश्च'' पाठस्य कथासारांशं लिखत ।

**XVI. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नान् उत्तरत ।** **1 × 4 = 4**

36. चाणक्यः मगधदेशस्य चन्द्रगुप्तमौर्यस्य मन्त्री आसीत् । सः एकस्मिन् कुटीरे वसति स्म । एकदा राजा चन्द्रगुप्तः दरिद्रेभ्यः दातुं कम्बलान् दत्तवान् । केचन चोराः कम्बलान् चोरयितुं चाणक्यस्य उटजम् आगताः ।

तदा शीतकालः आसीत् तथापि चाणक्यः कम्बलं विना भूमौ सुप्तः आसीत् । आश्चर्यचकिताः चोराः चाणक्यं प्रबोधितवन्तः । ते अपृच्छन् ''अत्र कम्बलाः सन्ति । शैत्यमपि अस्ति । तथापि त्वं किमर्थं कम्बलं विना भूमौ शयनं करोषि'' इति । चाणक्यः अवदत् – 'दरिद्रेभ्यः दातुं राजा दत्तवान् एतान् कम्बलान्' । एते मम कृते न'' । एतत् श्रुत्वा चोराः अपि सज्जनाः अभवन् । अन्येषां द्रव्यस्य उपयोगः अधर्मः इति चाणक्यस्य सन्देशः ।

**प्रश्नाः**

i) चाणक्यः कस्य मन्त्री आसीत् ?

ii) चाणक्यस्य उटजं के आगताः ?

iii) चोराः कं प्रबोधितवन्तः ?

iv) चाणक्यस्य सन्देशः कः ?

**XVII. दशवाक्यैः प्रबन्धं लिखत ।** **1 × 4 = 4**

37. परिसरः ।

**अथवा**

संस्कृतभाषायाः वैशिष्ट्यम् ।

**XVIII. पत्रं लिखत ।** **1 × 5 = 5**

38. शिवमोग्गामण्डलस्य सर्वकारीयविद्यालयस्य छात्रः/छात्रा इति मत्वा दिनत्रयस्य विरामं सम्प्रार्थ्य मुख्योपाध्यायं प्रति पत्रं लिखत ।

**अथवा**

चित्रदुर्गमण्डलस्य सर्वकारीयविद्यालयस्य छात्रः/छात्रा इति मत्वा अध्ययनविषये दावणगेरे नगरे वर्तमानं पितरं प्रति पत्रं लिखत ।

67-S 10/507

DO NOT WRITE ANYTHING HERE